स्नानं समाचरेत् । प्रसङ्गतः स्नानविधिं वक्ष्यामि कलसोद्भव ! । विधिस्नानं यतः प्राहुः स्नानाच्छतगुणोत्तरम् । विशुद्धां मृदमादाय बर्हींषि तिलगोमयम् । शुचौ देशे परिस्थाप्य चाचम्य स्नानमाचरेत् । उपपद्धौ बद्धशिखो जलमध्ये समाविशेत् । उरुंहीति मन्त्रेण तोयमावर्त्य संस्थितः । ये ते शतं ततो जप्यात् तोयस्याभिमन्त्रणाय च । सुमित्रायान इति मन्त्रेण पूर्वं कृत्वा जलाञ्जलिम् । क्षिपेद् द्वेष्यं समुद्दिश्य जपन् दुर्मित्रिया इति । इदं विष्णुरिदं जप्त्वा लिम्पेदङ्गानि मृत्स्नया । मृदैकया शिरः क्षाल्यं द्वाभ्यां नाभेस्तथोपरि । नाभेरधस्तु तिसृभिः पादौ षड्भिर्विशोधयेत् । मज्जेत् प्रवाहाभिमुख आपो अस्मानिमं जपन् । उदिताभ्यः शुचिरिति मन्त्र उन्मज्जने मतः । मानस्तोकमिमं जप्त्वा लिम्पेद्गात्राणि गोमयैः । इमं मे वरुणेत्यादिमन्त्रैः स्नानाभिषेचनम् । तत्त्वा यामि तथा त्वन्नः स त्वन्नस्याप्युदुत्तमम् । धाम्नाधाम्नस्तथामापो मौषधीरिति संजपेत् । यद्वा दुरप्सा मुञ्चन्तु सेतिमावभृथेति च । अष्टावेता इमे मन्त्राः प्रोक्ताः स्नानाभिषेचने । प्रणवेन ततो विप्रो महाव्याहृतिभिस्ततः । आत्मानं पावयेद्विद्वान् गायत्र्या च ततः कृती । आपो हिष्ठेति तिसृभिः प्रत्यृचं पावनं स्मृतम् । एते वै पावना मन्त्रा इदमापोहविष्मती । देवीराप आपो देवा द्रुपदादिवसंज्ञकः । शन्नो देवी रपो देवीरप्सु वरमित्यपि । पुनन्तु मेति च नव पावमान्यः प्रकीर्त्तिताः । ततोऽघमर्षणं जप्त्वा द्रुपदां च ततो जपेत् । प्राणायामं च विधिवदथ वान्तर्जले जपेत् । प्रणवं त्रिर्जपेद्वापि विष्णुं वा संस्मरेत् सुधीः । स्नात्वेत्थं वस्त्रमापीड्य गृह्णीयाद्धौतवाससी" ।

**स्नानतृण** न० स्नानार्थं तृणम् । कुशे शब्दर० ।

**स्नानीय** त्रि० स्नानाय हितम् छ । स्नानसाधने तैलोद्वर्त्तनादौ

**स्नायु** स्त्री स्नाति-शुध्यति दोषोऽनया स्ना उण् । शरीरादिबन्धननाड़ीभेदे तत्स्वरूपसंख्यादि भावप्र० उक्तं यथा "तत्र स्नायोः स्वरूपमाह । मेदसः स्नेहमादाय सिरा स्नायुत्वमाप्नुयात् । सिराणां हि मृदुः पाकः स्नायूनान्तु ततः खरः । स्नायवो बन्धनानि स्युर्देहमांसास्थिमेदसाम् । सन्धीनामपि यत्नात्तु सिराभ्यः सुदृढाः स्मृताः । नौर्यथा फलकास्तीर्णा बन्धनैर्बहुभिर्युता । निर्मुक्ताऽगाधसलिले भवेद्भारसहा ध्रुवम् । एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः । स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नराः" । फलकैः काष्ठखण्डैः आस्तीर्णा व्याप्ताः "शतानि नव जायन्ते शरीरे स्नायवो नृणाम् । तासां विवरणं ब्रूमः शिष्याः शृणुत यत्नतः । शाखासु षट्शतानि स्युः कोष्ठे त्रिंशत् शतद्वयम् । ग्रीवायां मूर्द्धदेशे तु स्नायूनां सप्ततिः स्मृताः" । तत्र शाखागताः प्राह । एकैकस्यां पदाङ्गुल्यां षट् षट् तास्त्रिंशत् । तावन्त्य एव तलकूर्चगुल्फेषु । तावन्त्य एव जङ्घायां दश जानुनि । चत्वारिंशदूरौ । दश वङ्क्षणे । एवं सार्द्धशतमेकस्मिन् सक्थिनि भवन्ति । एतेनेतरसक्थि बाहू च व्याख्यातौ । अथ कोष्ठगताः प्राह षष्टिः कट्यां तावन्त्य एव पार्श्वयोः । अशीतिः षट्त्रिंशदुरसि । अथ ग्रीवोर्द्ध्वगताः प्राह षट्त्रिंशद् ग्रीवायाम् । चतुस्त्रिंशन् मूर्ध्नि एवं स्नायूनां नवशतानि भवन्ति" ।

**स्नायुरोग** पुं० ६तत्० । स्नायुस्थे रोगभेदे तन्निदानादि भावप्र० उक्तं यथा

"तत्र स्नायुरोगस्य विप्रकृष्टं सामान्यलक्षणमाह "शाखासु कुपितो दोषः शोथं कृत्वा विसर्पवत् । भित्त्वैव तं क्षते तत्र सोष्णमांसं विशोष्य च । कुर्यात्तन्तुनिभं सूत्रं तत्पिण्डैस्तक्रसक्तुजैः । शनैः शनैः क्षताद् याति छेदात्तत्कोपमावहेत् । तत्पातात्शोथशान्तिः स्यात् पुनः स्थानान्तरे भवेत् । स्नायुरोग इतिख्यातः क्रियोक्तात्र विसर्पवत् । बाह्वोर्यदि प्रमादेन त्रुट्यते जङ्घयोरपि । सङ्कोचं खञ्जताञ्चापि छिन्नो नूनं करोत्यसौ" ।

**स्नाय्वर्म्मन्** न० नेत्ररोगभेदे "स्थिरं प्रस्तारिमांसाढ्यं शुष्कं स्नाय्वर्म पञ्चमम्" माधवनिदानम् ।

**स्निग्ध** त्रि० स्निह-क्त । स्नेहयुक्ते १सरसे २मसृणे चिक्कणे अमरः । ३रक्तैरण्डे ४सरलवृक्षे च पुं० राजनि० ५भक्तमण्डे न० ६मेदायां स्त्री राजनि० ।

**स्निग्धतण्डुल** पुं० ६ब० । षष्टिधान्ये राजनि० । [शब्दर० ।

**स्निग्धता** स्त्री स्निग्धस्य भावः । १स्नेहे राजनि० २प्रियत्वे च

**स्निग्धदारु** पुं० स्निग्धं दारु काष्ठमस्य । १सरलवृक्षे जटा० २देवदारुवृक्षे च राजनि० ।

**स्निग्धपत्रक** पुं० स्निग्धं पत्रमस्य कप् । १घृतकरञ्जे २गुच्छकरञ्जे ३गर्जरवृक्षे च राजनि० ४बदर्यां स्त्री जटा० । ५पालक्यां ६काश्मर्याञ्च स्त्री राजनि० । [च राजनि० ।

**स्निग्धपिण्डीतक** पुं० कर्म० । १मदनवृक्षभेदे २पिण्डीतकवृक्षे

**स्निग्धफला** स्त्री स्निग्धं फलमस्याः । नाकुल्याम् राजनि० ।

**स्निट** स्नेहे चु० उभ० सक० सेट् । स्नेटयति-ते असिस्निटत्-